# Shri Krishnamangalam

# શ્રીકૃષ્ણમઙ્ગલમ્

## Document Information

Text title : Shri Krishnamangalam 1 05 13

File name : kRRiShNamangalam.itx

Category : vishhnu, krishna, mangala

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-13

Latest update : August 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણમઙ્ગલમ્

મઙ્ગલં બાલકૃષ્ણાય દિવ્યલીલાય મઙ્ગલમ્ ।
મઙ્ગલં નીલવર્ણાય માતૃમાન્યાય મઙ્ગલમ્ ॥ ૧॥

મઙ્ગલં રુક્મિણીશાય જગદીશાય મઙ્ગલમ્ ।
મઙ્ગલં યદુનાથાય દીનનાથાય મઙ્ગલમ્ ॥ ૨॥

મઙ્ગલં દેવદેવાય વાસુદેવાય મઙ્ગલમ્ ।
મઙ્ગલં નન્દપુત્રાય સદાનન્દાય મઙ્ગલમ્ ॥ ૩॥

મઙ્ગલં પૂતનાહન્ત્રે લીલામર્ત્યાય મઙ્ગલમ્ ।
મઙ્ગલ શકટચ્છેત્રે પદ્મપાદાય મઙ્ગલમ્ ॥ ૪॥

મઙ્ગલં વત્સપાલાય વિશ્વપાલાય મઙ્ગલમ્ ।
મઙ્ગલં યોગિમૃગ્યાય ગોપમિત્રાય મઙ્ગલમ્ ॥ ૫॥

મઙ્ગલં બાલગોપાય બ્રહ્મવિદ્યાય મઙ્ગલમ્ ।
મઙ્ગલં કમલાભર્ત્રે ગોપીકાન્તાય મઙ્ગલમ્ ॥ ૬॥

મઙ્ગલં માતૃબદ્ધાય જડઘ્નાયાસ્તુ મઙ્ગલમ્ ।
મઙ્ગલં ક્રીડતે સ્ત્રીભિઃ કુન્દારૂઢાય મઙ્ગલમ્ ॥ ૭॥

મઙ્ગલં દ્વિષતે ક્રૂરાન્ પ્રિયાક્રૂરાય મઙ્ગલમ્ ।
મઙ્ગલં વલ્લવીભર્ને કંસઘ્નાયાસ્તુ મઙ્ગલમ્ ॥ ૮॥

મઙ્ગલં પ્રીતભક્તાય વિદ્યાવાસાય મઙ્ગલમ્ ।
મઙ્ગલં માગધજિતે દ્વારકેશાય મઙ્ગલમ્ ॥ ૯॥

મઙ્ગલં પાર્થસુહૃદે જિતદૈત્યાય મઙ્ગલમ્ ।
મઙ્ગલં રુક્મિણીજાને રુક્મિણીશાય મઙ્ગલમ્ ॥ ૧૦॥

મઙ્ગલં નૈકરૂપાય નરદૈત્યાય મઙ્ગલમ્ ।
પુત્રિણે નિત્યરૂપાય બ્રહ્માચાર્યાય મઙ્ગલમ્ ॥ ૧૧॥

મઙ્ગલં દ્રૌપદીડ્યાય માનદાયાસ્તુ મઙ્ગલમ્ ।
મઙ્ગલં પ્રિયભક્તાય ભક્તપાલાય મઙ્ગલમ્ ॥ ૧૨॥

મઙ્ગલં દિશતે કામાન્ વિપ્રપ્રાર્થ્યાય મઙ્ગલમ્ ।
મઙ્ગલં શિષ્ટપાલાય ભારદ્વાયાસ્તુ મઙ્ગલમ્ ॥ ૧૩॥

મઙ્ગલં માયિનેઽમાયસારથ્યાયાસ્તુ મઙ્ગલમ ।
મઙ્ગલં પૂર્ણરૂપાય ગીતાચાર્યાય મઙ્ગલમ્ ॥ ૧૪॥

મઙ્ગલં વિશ્વરૂપાય યોગિધ્યેયાય મઙ્ગલમ્ ।
મઙ્ગલં વિશ્વગુરવે કૃપાવાસાય મઙ્ગલમ્ ॥ ૧૫॥

મઙ્ગલં જ્ઞાનરૂપાય સર્વાભિજ્ઞાય મઙ્ગલમ્ ।
મઙ્ગલં સર્વશક્તાય મહાસત્ત્વાય મઙ્ગલમ્ ॥ ૧૬॥

મઙ્ગલં દિવ્યવીર્યાય માહેશ્વર્યાય મઙ્ગલમ્ ।
મઙ્ગલં તેઽચ્યુતા ય સત્કુલત્રાણાય મઙ્ગલમ્ ॥ ૧૭॥

ઇતિ શ્રીકૃષ્ણમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Krishnamangalam*

pdf was typeset on August 15, 2022

Please send corrections to *sanskrit@cheerful.com*